## 23. त्रयोविंशः पाठः

## आश्रमः

पञ्चमी-विभक्तिः

एषः मुनिवरस्य आश्रमः । आश्रमस्य पार्श्वे एका लघुनदी प्रवहति । सा महानद्याः प्रभवति । नद्याः तीरे अस्ति आश्रमः । आश्रमे मुनिवरस्य शिष्याः अपि वसन्ति । ते प्रतिदिनं मुनिवरात् शास्त्राणि पठन्ति । ते अरण्यात् समिधः आनयन्ति । ते ग्रामेभ्यः भिक्षावस्तूनि आनयन्ति, पाककार्यं कुर्वन्ति । नदीतः जलम् आनीय वृक्षान् लताः च सिञ्चन्ति । वृक्षेभ्यः फलानि आनीय अतिथिसत्कारम् अपि ते कुर्वन्ति ।

आश्रमपरिसरे हरिणाः, धेनवः इत्यादयः निवसन्ति । हिंस्रपशवः अपि निवसन्ति । परस्परं द्वेषः नास्ति आश्रमस्य परिसरे । अतः न बिडालात् बिभेति मूषकः, न शुनकात् बिभेति बिडालः, न जनेभ्यः बिभ्यति वानराः, न क्रूरमृगेभ्यः भीताः भवन्ति हरिणादयः ।

ग्रामीणाः प्रतिदिनम् आश्रमम् आगच्छन्ति । ते मुनिवरात् उपदेशं शृण्वन्ति । 'धर्मात् विना मुक्तिः सुखं वा नास्ति' । इति मुनिवरः उपदिशति । सः जनान् पापेभ्यः रक्षति । 'अहिंसा परमो धर्मः', अतः 'हिंस ातः विरमन्तु' इत्यपि उपदिशति सः । ग्रामीणाः महिलाः नदीतः जलं नेतुम् आश्रमसमीपम् आगच्छन्ति । ताः शिष्यान् पुत्रवत् पश्यन्ति । गृहात् फलानि क्षीरं च आनीय समर्पयन्ति ।

सुभाषितानि -

(1)
अन्नात् भवन्ति भूतानि पर्जन्यात् अन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यः यज्ञः कर्म समुद्भवः ।।

(2)
ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ।
क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति ।।

(3)
लोभात् क्रोधः प्रभवति क्रोधात् द्रोहः प्रवर्तते ।
द्रोहेण नरकं याति शास्त्रज्ञोऽपि विचक्षणः ।।